श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## યુગલ ગીત



रोम रोम श्रीकृष्ण में डूबा, अंग अंग से उठती प्रीत।
अद्भुत छटा निहार प्रभु की, गोपियां गाती युगल गीत।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**
**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**દશમઃ સ્કન્ધઃ**

**.. અથ પઞ્ચત્રિંશોઽધ્યાયઃ ..**

**શ્રીશુક ઉવાચ**

**ગોપ્યઃ(ખ્) કૃષ્ણે વનં(મ્) યાતે, તમનુદ્રુતચેતસઃ .**
**કૃષ્ણલીલાઃ(ફ્) પ્રગાયન્ત્યો, નિન્યુર્દુઃખેન વાસરાન્ .. ૧..**

તમનુદ્રુ + તચેતસઃ, નિન્યુર્ + દુઃખેન

**ગોપ્ય ઊચુઃ**

**વામબાહુકૃતવામકપોલો,**
**વલ્ગિતભ્રુરધરાર્પિતવેણુમ્ .**
**કોમલાઙ્ગુલિભિરાશ્રિતમાર્ગં(ઙ્)**
**ગોપ્ય ઈરયતિ યત્ર મુકુન્દઃ .. ૨..**

વામ + બાહુકૃતવા + મકપોલો , વલ્ગિત + ભ્રુરધરાર્ + પિતવેણુમ્ ,

કોમલા(ઙ્) + ગુલિભિરા + શ્રિતમાર્ગં(ઙ્)

વ્યોમયાનવનિતાઃ(સ્) સહસિદ્ધૈર્-
વિસ્મિતાસ્તદુપધાર્ય સલજ્જાઃ .
કામમાર્ગણસમર્પિતચિત્તાઃ(ખ્)
કશ્મલં(મ્) યયુરપસ્મૃતનીવ્યઃ .. ૩..

વ્યોમયા + નવનિતાઃ(સ્), વિસ્મિતાસ્ + તદ્ + પધાર્ય

કામ + માર્ગણ + સમર્પિત + ચિત્તાઃ(ખ્)

યયુ + રપસ્ + મૃતનીવ્યઃ

હન્ત ચિત્રમબલાઃ(શ્) શૃણુતેદં(મ્),
હારહાસ ઉરસિ સ્થિરવિદ્યુત્ .
નન્દસૂનુરયમાર્તજનાનાં(ન્)
નર્મદો યર્હિ કૂજિતવેણુઃ .. ૪..

ચિત્ર + મબલાઃ(શ્), નન્દ + સૂનુ + રયમાર્ત + જનાનાં(ન્)

વૃન્દશો વ્રજવૃષા મૃગગાવો,
વેણુવાદ્યહૃતચેતસ આરાત્ .
દન્તદષ્ટકવલા ધૃતકર્ણા,
નિદ્રિતા લિખિતચિત્રમિવાસન્ .. ૫..

વેણુ + વાદ્ય + હૃતચેતસ , દન્ત + દષ્ટ + કવલા ,
લિખિત + ચિત્ર + મિવાસન્

બર્હિણસ્તબકધાતુપલાશૈર્-
બદ્ધમલ્લપરિબર્હવિડમ્બઃ .
કર્હિચિત્ સબલ આલિ સ ગોપૈર્-
ગાઃ(સ્) સમાહ્વયતિ યત્ર મુકુન્દઃ .. ૬..

બર્હિણસ્ + તબકધા + તુપલાશૈર્ ,
બદ્ધ + મલ્લ + પરિબર્હ + વિડમ્બઃ , સમાહ્ + વયતિ

**તર્હિ ભગ્નગતયઃ(સ્) સરિતો વૈ,**
**તત્પદામ્બુજરજોઽનિલનીતમ્ .**
**સ્પૃહયતીર્વયમિવાબહુપુણ્યાઃ(ફ્)**
**પ્રેમવેપિતભુજાઃ(સ્) સ્તિમિતાપઃ .. ૭..**

ભગ્ન + ગતયઃ(સ્), તત્પદામ્ + બુજરજોઽ + નિલનીતમ્

સ્પૃહયતીર્ + વયમિવા + બહુપુણ્યાઃ(ફ્) ,

પ્રેમ + વેપિત + ભુજાઃ(સ્)

**અનુચરૈઃ(સ્) સમનુવર્ણિતવીર્ય,**
**આદિપૂરુષ ઇવાચલભૂતિઃ .**
**વનચરો ગિરિતટેષુ ચરન્તીર્-**
**વેણુનાઽઽહ્વયતિ ગાઃ(સ્) સ યદા હિ .. ૮..**

સમ + નુવર્ણિ + તવીર્ય , ઇવા + ચલભૂતિઃ,

વેણુનાઽઽહ્ + વયતિ

**વનલતાસ્તરવ આત્મનિ વિષ્ણું(મ્),**
**વ્યં(ઞ્)જયન્ત્ય ઇવ પુષ્પફલાઢ્યાઃ .**
**પ્રણતભારવિટપા મધુધારાઃ(ફ્)**
**પ્રેમહૃષ્ટતનવઃ(સ્) સસૃજુઃ(સ્) સ્મ .. ૯..**

વનલતાસ્ + તરવ ,પુષ્પ + ફલાઢ્યાઃ, પ્રણત + ભાર + વિટપા ,

પ્રેમ + હૃષ્ટ + તનવઃ(સ્)

**દર્શનીયતિલકો વનમાલા-**
**દિવ્યગન્ધતુલસીમધુમત્તૈઃ .**
**અલિકુલૈરલઘુગીતમભીષ્ટ-**
**માદ્રિયન્ યર્હિ સન્ધિતવેણુઃ .. ૧૦..**

દર્શની + યતિલકો , દિવ્યગન્ધ + તુલસી + મધુમત્તૈઃ

અલિકુલૈ + રલઘુગી+ તમભીષ્ટ , સન્ધિ + તવેણુઃ

સરસિ સારસહં(વ્)સવિહઙ્ગાશ્-
ચારુગીતહૃતચેતસ એત્ય .
હરિમુપાસત તે યતચિત્તા,
હન્ત મીલિતદૃશો ધૃતમૌનાઃ .. ૧૧..

સારસહં(વ્)સ + વિહઙ્ગાશ્ , ચારુ + ગીતહૃત + ચેતસ,  હરિ + મુપાસત , મીલિ + તદૃશો

સહબલઃ(સ્) સ્રગવતં(વ્)સવિલાસઃ(સ્),
સાનુષુ ક્ષિતિભૃતો વ્રજદેવ્યઃ .
હર્ષયન્ યર્હિ વેણુરવેણ,
જાતહર્ષ ઉપરમ્ભતિ વિશ્વમ્ .. ૧૨..

સ્રગવતં(વ્) + સવિલાસઃ(સ્), ક્ષિતિ + ભૃતો ,વેણુ + રવેણ

મહદતિક્રમણશં(ઙ્)કિતચેતા,
મન્દમન્દમનુગર્જતિ મેઘઃ .
સુહૃદમભ્યવર્ષત્ સુમનોભિશ્
છાયયા ચ વિદધત્ પ્રતપત્રમ્ .. ૧૩..

મહદતિ + ક્રમણશં(ઙ્) + કિતચેતા ,મન્દ + મન્દ + મનુગર્જતિ , સુહૃદમભ્ + યવર્ષત્

વિવિધગોપચરણેષુ વિદગ્ધો,
વેણુવાદ્ય ઉરુધા નિજશિક્ષાઃ .
તવ સુતઃ(સ્) સતિ યદાધરબિમ્બે
દત્તવેણુરનયત્ સ્વરજાતીઃ .. ૧૪..

વિવિધ + ગોપ + ચરણેષુ , યદા + ધરબિમ્બે , દત્તવેણુ + રનયત્

સવનશસ્તદુપધાર્ય સુરેશાઃ(શ્),
શક્રશર્વપરમેષ્ઠિપુરોગાઃ .
કવય આનતકન્ધરચિત્તાઃ(ખ્)
કશ્મલં(મ્) યયુરનિશ્ચિતતત્ત્વાઃ .. ૧૫..

સવનશસ્ + તદુ + પધાર્ય, શક્રશર્વ + પરમેષ્ઠિ + પુરોગાઃ આનત + કન્ધ + રચિત્તાઃ(ખ્) ,યયુ + રનિશ્ચિત+ તત્ત્વાઃ

**નિજપદાબ્જદલૈર્ધ્વજવજ-**
**નીરજા(ઙ્)કુશવિચિત્રલલામૈઃ .**
**વ્રજભુવઃ(શ્) શમયન્ ખુરતોદં(મ્),**
**વર્ષ્મધુર્યગતિરીડિતવેણુઃ .. ૧૬..**

નિજપદાબ્ + જદલૈર્ + ધ્વજ + વજ , નીરજા(ઙ્) + કુશવિચિત્ર + લલામૈઃ , વર્ષ્મ + ધુર્યગતિ + રીડિત + વેણુઃ

**વ્રજતિ તેન વયં(મ્) સવિલાસ,**
**વીક્ષણાર્પિતમનોભવવેગાઃ .**
**કુજગતિં(ઙ્) ગમિતા ન વિદામઃ(ખ્)**
**કશ્મલેન કબરં(મ્) વસનં(મ્) વા .. ૧૭..**

વીક્ષણાર્ + પિતમનો + ભવવેગાઃ

**મણિધરઃ(ખ્) ક્વચિદાગણયન્ ગા,**
**માલયા દયિતગન્ધતુલસ્યાઃ .**
**પ્રણયિનોઽનુચરસ્ય કદાં(વ્)સે,**
**પ્રક્ષિપન્ ભુજમગાયત યત્ર .. ૧૮..**

ક્વચિદા + ગણયન્ , દયિત + ગન્ધ + તુલસ્યાઃ , પ્રણયિનોઽ + નુચરસ્ય

**ક્વણિતવેણુરવવં(ઞ્) ચિતચિત્તાઃ(ખ્)**
**કૃષ્ણમન્વસત કૃષ્ણગૃહિણ્યઃ .**
**ગુણગણાર્ણમનુગત્ય હરિણ્યો,**
**ગોપિકા ઇવ વિમુક્તગૃહાશાઃ .. ૧૯..**

ક્વણિત + વેણુ + રવવં(ઞ્) + ચિતચિત્તાઃ(ખ્), કૃષ્ણ + મન્ + વસત

ગુણગણાર્ + ણમનુગત્ય , વિમુક્ત + ગૃહાશાઃ

**કુન્દદામકૃતકૌતુકવેષો,**
**ગોપગોધનવૃતો યમુનાયામ્ .**
**નન્દસૂનુરનઘે તવ વત્સો,**
**નર્મદઃ(ફ્) પ્રણયિનાં(મ્) વિજહાર .. ૨૦..**

કુન્દદા + મકૃત + કૌતુકવેષો , ગોપ + ગોધ + નવૃતો ,નન્દસૂ + નુરનઘે

**મન્દવાયુરુપવાત્યનુકૂલં(મ્)**
**માનયન્ મલયજસ્પર્શેન .**
**વન્દિનસ્તમુપદેવગણા યે,**
**વાદ્યગીતબલિભિઃ(ફ્) પરિવવ્રુઃ .. ૨૧..**

મન્દ + વાયુરુપ + વાત્ય + નુકૂલં(મ્) , મલય + જસ્પર્શેન

વન્દિનસ્ + તમુપ + દેવગણા , વાદ્ય + ગીત + બલિભિઃ(ફ્)

**વત્સલો વ્રજગવાં(મ્) યદગધ્રો,**
**વન્દ્યમાનચરણઃ(ફ્) પથિ વૃદ્ધૈઃ .**
**કૃત્સ્નગોધનમુપોહ્ય દિનાન્તે,**
**ગીતવેણુરનુગેડિતકીર્તિઃ .. ૨૨..**

વન્દ્યમા + નચરણઃ(ફ્) , કૃત્સ્ન + ગોધ + નમુપોહ્ય , ગીત + વેણુરનુ + ગેડિત + કીર્તિઃ

**ઉત્સવં(મ્) શ્રમરુચાપિ દૃશીના-**
**મુન્નયન્ ખુરરજશ્છુરિતસ્રક્ .**
**દિત્સયૈતિ સુહૃદાશિષ એષ,**
**દેવકીજઠરભૂરુડુરાજઃ .. ૨૩..**

ખુર + રજશ્ + છુરિત + સ્રક્ , દેવકી + જઠરભૂ + રુડુરાજઃ

**મદવિઘૂર્ણિતલોચન ઈષન્,**
**માનદઃ(સ્) સ્વસુહૃદાં(મ્) વનમાલી .**
**બદરપાણ્ડુવદનો મૃદુગણ્ડં(મ્)**
**મણ્ડયન્ કનકકુણ્ડલલક્ષ્મ્યા .. ૨૪..**

મદવિઘૂર્ + ણિત + લોચન ,બદર + પાણ્ડુ + વદનો , કનક + કુણ્ડલ + લક્ષ્મ્યા

**યદુપતિર્દ્વિરદરાજવિહારો,**
**યામિનીપતિરિવૈષ દિનાન્તે .**
**મુદિતવક્ત્ર ઉપયાતિ દુરન્તં(મ્)**
**મોચયન્ વ્રજગવાં(ન્) દિનતાપમ્ .. ૨૫..**

યદુપતિર્ + દ્વિર + દરાજ + વિહારો , યામિની + પતિ + રિવૈષ ,મુદિ + તવક્ત્ર

**શ્રીશુક ઉવાચ**

**એવં(મ્) વ્રજસ્ત્રિયો રાજન્, કૃષ્ણલીલા નુ ગાયતીઃ .**

**રેમિરેઽહઃ(સ્)સુ તચ્ચિત્તાસ્- તન્મનસ્કા મહોદયાઃ .. ૨૬..**

તય્ + ચિત્તાસ્

**ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં(ન્)**

**દશમસ્કન્ધે પૂર્વાર્ધે વૃન્દાવનક્રીડાયાં(ઙ્) ગોપિકાયુગલગીતં(ન્) નામ પઞ્ચત્રિંશોઽધ્યાયઃ**

**ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે**

**પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.**

**ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ**

